ग्रंथ सं० — विषय धर्मशास्त्रम्

नाम आशीर्मन्त्रविचारः (कराचारभाष्यस्थः) ग्रंथकार

पत्र सं० १-१५.

श्लोक सं० — अक्षर सं० (पंक्तौ) ३५. पंक्ति सं० (पृष्ठे) ९

आकार: १०.३" x ४.६"! लिपि: दे.ना. आधार: का.

वि० विवरणम् पू० — 13701

पी० एस० यू० पी०—७६ एस० पी० ई०—१६४१—५०.०००

आ०७३१८

Indira Gandhi National Centre for the Arts

Indira Gandhi National
Centre for the Arts

पृ०
१ आगतो शापनः ननु ततो ब्राह्मणभोजनमिति भोजनशब्दस्याशीर्वादोपलक्षकत्वात्कर्मस
माप्त्यनंतरमाशीर्वचनग्राह्यमित्युक्तं तत्कल्पनायां किंचिन्मानमस्ति स्वस्तिवाचनमंत्रेष्टमित्य
श्वलायनकारिकायास्तु स्वस्तिवाचनकरणोक्तं ...त्वात्कर्मणामाद्यंतयोः स्वस्तिवाचनं क
र्तव्यं इति अर्थपरत्वादिति चेत्सत्यं आशीर्वचनस्यापि पुण्याहवाचनांतःपातित्वेन तस्यास्त
द्विधायकत्वसंभवात् ब्राह्मणभोजनस्याशीर्वचनावांतरफलत्वाच्च किंच शतपथब्राह्मणो
क्ता आशिष आशास्ते यजमानायेत्यादेरनारभ्याधीतत्वादारभ्याधीतसमानाधिकरणत्वेना
रभ्याधीतत्वात्सर्वं गुणा इति परिभाषाध्याये निहितत्वात्प्रामाण्यमस्ति तथा च बह्वृचप्राची
नपद्धतिषु ब्राह्मणान्भोज्याशिषो गृहीत्वा सानुयविसर्ज्य सुहृद्युतो भुंजीतेति दर्शनाद्वि राम
ष्टाचाराच्च ब्राह्मणभोजनस्याशीर्वादोपलक्षकत्वमक्षतं तत्रादौ स्वशाखीयो ग्राह्य तदुक्तं १

स्मृत्यंतरे सूत्रोदितं कर्म यथाविधि स्यात्तथैव कुर्यात्त्वगृह्यपरिष्टं वेदोक्तमाशीर्वचनं वि
धेयमादौ स्वशाखीपरगोन्यशाखी १ सर्वत्रकर्मणामंते मंत्राशिषमनुत्तमां दद्युर्विप्राः स्व
शाखोक्तामादौ तत्कर्मशाखिन इति एवमधीत्यशाखानामभावे अन्यशाखां ततः पठेद्वि
ति स्वशाखालक्षणं तु स्वाध्यायापरपर्यायो यः स्वपरंपरापरिगृहीतो वेद इति नयस्य यस्य
वेदस्य या या शाखा स्वपरंपरागृहीतास्तस्यास्तस्याः स्वशाखात्वं तथा च स्वाध्यायविधि
नास्वशाखोक्तमेव कर्म प्रसज्यते स्वाध्यायाध्ययनस्य इष्टार्थत्वेन कर्मानुष्ठानार्थत्वात्
त उक्तं वशिष्ठस्मृतौ पारंपर्यागतो येषां वेदः सपरिबृंहणाः तच्छाखं कर्म कुर्वीत तच्छाखाध्या
यनं तथा यः स्वशाखां परित्यज्य मोहाद्धि कर्म वैदिकं आचरं परशाखोक्तं शास्त्रार्थं दुःसउ
च्यते मनुस्मृतौ स्वशाखोक्तं समुत्सृज्य परशाखोक्तमाचरन् अप्रमाणमृषिं कृत्वा सो

Indira Gandhi National Centre for the Arts

कुं०
२ धं तमस्मिन्स्तुतीति मधुपर्के तु सचार्ध्यशाखया कार्य इति वचनादर्ध्यशाखादरः आश्वलायना
दीनां स्वानुष्ठाना हीमाध्यंदिनादीनां स्वस्तिवाचनादौ... ध्यंदिनादीनां स्वा) पन्नाम्नातं स्वशाखाया
मित्यादिवचनेनाग्निहोत्रादौ परस्पराकांक्षत्वेनाचरन् परशाखोक्तमित्यादिवचनानवकाश इति
ध्येयं अत्रेदं विचार्यते कण्वमाध्यंदिनादिवाजसनेयिभिः पठ्यमानो मुख्यो यजुर्वेद उत्तमशा
खेति तत्रोभयथा वचनदर्शनात्संदेहः तथाहि तैत्तिरीयब्राह्मणे भरद्वाजो ह त्रिभिरायुर्भि
र्ब्रह्मचर्यमुवास तं ह जीर्णं स्थविरं शयानं इन्द्र उपव्रज्योवाच भरद्वाज यत्ते चतुर्थमायु
र्दद्यां किमनेन कुर्या इति ब्रह्मचर्यमेवैनेन चरेयमिति होवाच तं ह त्रीन् गिरिरूपानविज्ञाता
निव दर्शयांचकार तेषां हैकैकस्मान्मुष्टिनाददे स होवाच भरद्वाजेत्यामंत्र्य वेदा वा एते राम
अनंता वै वेदाः एतद्वा एतैस्त्रिभिरायुर्भिरन्ववोचथा अथ त इतरदननूक्तमेव एहि इमं विद्धि २

शा

अयं हि सर्वविद्येति सर्वासां शाखानां वेदशब्दाभिधानात् स्कांदे तु अवतीर्णो महायोगी
सत्यवत्यां पराशरात् उत्सन्नान्भगवान्वेदानुज्जहार हरिः स्वयं चतुर्धा विभज्य तांश्चतुर्विं
शतिधा पुनः शतधा चैकधा चैव तथैव च सहस्रधा अथर्वाणां द्वादशधा भित्त्वा शाखा अ
चीक्लृपदिति सामान्यतः शाखाशब्दश्रवणात् अत्र पूर्वपक्षः द्वापरादौ वेदव्यासेन स्वशिष्ये
भ्यश्चतुर्वेदा उपदिष्टास्त एव मुख्या वेदाः तैर्व्यासशिष्यैर्विभज्य स्वशिष्येभ्यो दत्ताः शाखा इ
ति तथा च वेदव्यासेनापस्तंबादिवेदानामेवापदेशात्त एव मुख्याः काण्वादयस्तु तदनंतर
भावित्वादमुख्या इति तदुक्तं द्वादशस्कंधे अस्मिन्नप्यंतरे ब्रह्मन् भगवान्लोकभावनः ब्रह्मे
शाद्यैर्लोकपालैर्याचितो धर्मगुप्तये पराशरात्सत्यवत्यामंशांशकलया विभुः अवतीर्णो महा
भाग वेदं चक्रे चतुर्विधं ऋगथर्वयजुःसामराशीनुद्धृत्य वर्गशः चतस्रः संहिताश्चक्रे सूत्रे

Indira Gandhi National
Centre for the Arts

दं॰ महीगणात् इव तासां स चतुरः शिष्यान् उपहूय महामतिः एकैकां संहितां ब्रह्मन्नेकैकस्मै ददौ वि
२ भुः पैलाय संहितामाद्यां बह्वृचाख्यामुवाच ह वैशंपायनसंज्ञाय निगदाख्यं यजुर्गणं साम्नां जैमिनये
प्राह तच्छंदोगसंहितां अथर्वांगिरसं प्राह स्वशिष्याय सुमंतवे तैश्च शिष्यप्रशिष्यैर्यथा
शाखाः प्रवर्तिताः यजुर्वेदे तैत्तिरीयशाखोत्पत्तिप्रस्तावमाह वैशंपायनशिष्या वै चरकाध्व
र्यवो भवन् ये चेरुर्ब्रह्महत्यांहः क्षपणं स्वगुरोर्व्रतं याज्ञवल्क्यश्च तच्छिष्य आहाहो भगवन् कियत्
चरितेनाल्पसाराणां चरिष्येऽहं सुदुश्चरं इत्युक्तो गुरुरप्याह कुपितो याह्यलं त्वया विप्रावमं
ताः शिष्येण मदधीतं त्यजाश्विति देवरातसुतः सोपि छर्दित्वा यजुषां गणं ततो गतोथ मुनयो
ददृशुस्तान् यजुर्गणान् यजूंषि तित्तिरीभूत्वा तल्लोलुपतयाददुः तैत्तिरीया इति यजुःशाखा आ राम
सन्सुपेशलाः काण्वमाध्यंदिनादि शाखाप्रसंगमाह याज्ञवल्क्यस्ततो ब्रह्मन् छंदांस्यधिगवे २

षयन् गुरोरविद्यमानानि सूपतस्थेर्कमीश्वरं गुरोर्वैशंपायनस्य व्यासेन विभज्यानुक्तत्वाद
विद्यमानानि अधिकानि गवेषयन् अन्वेषयन् सूपतस्थे सम्यक् स्तुतवान् ईश्वरं मत्वा वेदानां तथा
च श्रुतिः ऋग्भिः पूर्वाह्णे दिवि देव ईयते यजुर्वेदे तिष्ठति मध्ये अह्नः सामवेदेनास्तमये महीयते
वेदैरशून्यस्त्रिभिरेति सूर्य इति याज्ञवल्क्य उ॰ ॐ नमो भगवत इत्यादिना स्तोत्रेण एवं स्तुतस्तस्मै भ
गवान् वाजिरूपधरो रविः यजूंष्ययातयामानि मुनयेदात् प्रसादितः यजुर्भिरकरोच्छाखा दशपं
च शतैर्विभुः जगृहुर्वाजसन्यस्ताः काण्वमाध्यंदिनादयः पंचदशशाखाः शतैरपरिमितैः यजु
र्भिरकरोः शतैरिति पाठे स एव याज्ञवल्क्यः स्वैर्यजुर्भिरकरोदिति जगृहुरधीतवंतः ऋचिकाश्च
श्वरूपेणावाजेभ्यः केसरेभ्यः समुत्पन्नास्ताः वाजसन्यस्ताः शाखाः वाजसनीसंज्ञाः ताः शाखा
इति भिन्नं पदं वा इति प्रायेणाभिधीयते मंत्रब्राह्मणयोर्वेदः इति गुणात्मकप्रमाणे यजुर्वेदः सवित्रे



Indira Gandhi National
Centre for the Arts

त्रै. ४ योऽन्ये शाखांतरं स्मृतमिति परिशिष्टोक्तम् शुक्लयजुषाम् अयातयामत्वेन च काण्वादयो मुख्या इ
तरास्त्वमुख्यास्तत्रापि माध्यंदिनी शाखा या मुख्यपाठत्वात् यजुर्वेदपदवाच्यत्वमिति ननु इदं परि
शिष्टवचनमितरत्रापि समानमिति चेन्न वचनार्थासंभवात् तथाहि मंत्रब्राह्मणात्मके विशे
षमाह त्रिगुणं यत्र पठ्यते स यजुर्वेद इति तत्र त्रिगुणमिति क्रियाविशेषणं अथवा मंत्रब्राह्मणा
योरिति समस्तस्य पदस्य तुभ्याविविक्तस्य ब्राह्मणपदस्य नपुंसकलिंगस्य विशेषणं वा अन्यदा त
त्र प्रथमे पक्षे मंत्रब्राह्मणात्मको यो वेदस्य यत्र यस्यां शाखायां त्रिगुणं पठ्यते तथा पठ्येते स मुख्यो
यजुर्वेद इत्यर्थः संभवति तत्र त्रैगुण्यं किं विध्यर्थवादमंत्ररूपेण होस्वित् संहितापदक्रमरूपेण
वा नाद्यः शाखामात्रस्य विध्यर्थवादमंत्ररूपत्वे नातिव्याप्तेः द्वितीयस्तु काण्वमाध्यंदिनानामे राम
व संभवति तेषां मंत्रब्राह्मणात्मकवेदस्य संहितात्रिगुणपाठस्य विद्यमानत्वात् ननु इदं शतप ४



त्वब्राह्मणस्य पदक्रमपाठाभावात्कथं त्रैगुण्यमिति चेत्सत्यं न वयं शतपथब्राह्मणस्य त्रैगु
ण्यमिति ब्रूमः किंतु मंत्रांतःपातिब्राह्मणभागस्य ब्राह्मणो ब्राह्मणामित्यादिकस्य त्रैगुण्यमि
ति तच्च काण्वमाध्यंदिनानामेव संभवति नन्वापस्तंबादीनामपि ब्राह्मणस्य तथात्वात्संभवति
तादृशपाठ इति चेन्न तेषां संहितांतःपातिव्यंतरूपांशस्य ब्राह्मणत्वे मानाभावात् ननु प्रथमा
ष्टके संपश्यामि प्रजा अहमिह प्रजा सो मानवीरित्युपक्रम्य संपश्यामि प्रजा अहमित्याह यावं
तर एव ग्राह्याः परावस्तानेवावहं धेभस्यांभो भक्षीयेत्याह भात्येतामहमहो वो भक्षीयेत्याहम
होष्टेताः सहस्य सहो वो भक्षीयेत्याह सहोद्येता ऊर्जस्योर्जं वो भक्षीयेत्याद्युदेः काण्वमाध्यंदिना
दिसंहितायामपि वसंताय कपिंजलानालभत ग्रीष्माय कलविंकानित्यादेः (काण्वमध्यंदि
नादिसंहितायामपि वसंताय कपिंजलाना) तथा ब्राह्मणं तदृश्वराजन्यमित्यादे अव्याख्यान

सं० रूपं शतब्राह्मणं प्रमाणमग्रहस्तत्व इति चेत्सत्यं माध्यंदिनादिसंहितानां तःपाति व्याख्यानरू
५ पांशस्य ब्राह्मणत्वे सर्वानुक्रमणिकासूत्रे अभ्यस्तूपरो ब्राह्मणोध्यायस्तथा ब्राह्मणो ब्राह्मणमिति
ब्राह्मणोध्याय इति कात्यायनोक्तिः प्रमाणं आपस्तंबादीनामनुक्रमणिकाया अभावाद्वचनां
तराभावाद्व्याख्यानरूपांशस्य ब्राह्मणत्वव्यवहारः अन्यथा ब्राह्मणांतर्गतमंत्रभागस्यापि सं
हितात्वापत्तेः किंच व्याख्यानमात्रेण ब्राह्मणत्वे केशी इदं ज्योतिरुच्यते तथा कश्चिदेकाकी
त्यादि स्म ब्राह्मणं स्यात् तस्माद्यावद्वचनं वाचनिकमिति न्यायेन वाजसनेयीनां काण्वादीना
मेवेदं लक्षणं नान्येषामिति सिद्धं न द्वितीयः त्रिगुणशब्दस्य वेदशब्देनान्वये संभवति समस्तं ब्रा राम
ह्मणपदं विविच्यते नान्वयकथने व्यवहितान्वयदोषात् कल्पनागौरवाच्च भवतु वा व्यवहिता ५
न्वयः तत्र ब्राह्मणस्य त्रिगुणत्वं किं नाम संहितापेक्षया ग्रंथातो वा किंवा आदौ मंत्रप्रतीकं

गृहीत्वा तस्य व्याख्यानं कृत्वा पश्चात् मंत्रप्रतीकस्योपसंहार इति यथा आब्रह्मन्ब्राह्मणो ब्रह्म
वर्चसी जायतामित्याह ब्राह्मण एव ब्रह्मवर्चसं दधाति तस्मात्पुरा ब्राह्मणो ब्रह्मवर्चसी जायते
त्यादौ तथात्वदर्शनादिति अत्राद्यपक्षे मुख्यत्वं काण्वादीनामेव संभवति न त्वापस्तंबादीनां
शतपथब्राह्मणस्य संहितापक्षे यावद्ग्रंथस्त्रिगुणत्वोपलब्धेः आपस्तंबादीनां संहितायां ब्राह्म
णस्य च ग्रंथतः साम्यात् द्वितीयेपि किं मंत्रमात्रव्याख्यानत्वेन त्रिगुणपाठः किंवा मंत्रैकदे
शव्याख्यानत्वेन अत्रापि प्रथमपक्षः काण्वादीनामेव संभवति तेषां शतपथब्राह्मणे मंत्रमा
त्रस्य व्याख्यानात् आपस्तंबादिब्राह्मणस्य मंत्रसमानत्वेन मंत्रमात्रव्याख्यानत्वाभावात् नां
त्यः शाखांतरेष्वपि ब्राह्मणस्य मंत्रैकदेशव्याख्यानत्वेनातिव्याप्तेः मंत्रैकदेशव्याख्यानं तु
मैत्रायण्यादिशाखासु प्रसिद्धं अन्यद्वेति तृतीयोपि न तस्य विकल्पासहत्वाद् निर्वचनीयत्वा

Indira Gandhi National
Centre for the Arts

श्रु किंच शुक्लानीमानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायंत इति बृहदारण्यके श्रु
ते रि[illegible]मानि काण्वादीनि शुक्लानि शुद्धानि यजूंषि वाजसनेरपत्येन याज्ञवल्क्येन ऋषिणाग्रा
ख्यायंत इति बृहदारण्यके श्रुतेरिमानि काण्वादीनि शुक्लानि शुद्धानि यजूंषि वाजसनेरपत्ये
न याज्ञवल्क्येन ऋषिणाग्राख्यायंते स्वशिष्येभ्य उपदिश्यंत इति विद्यारण्यश्रीपादैर्व्याख्या
नत्वेन शुक्लं कृष्णमिति द्वेधा यजुस्संप्रदायः तत्र शुक्लं वाजसनेयं कृष्णं तु तैत्तिरीयकं अ
ध्वर्यवं ब्रह्मविद्भ्यो ऋत्विग्बुद्धिमालिन्यहेतुत्वात् यजुः कृष्णमीर्यते व्यवस्थितप्रकारतां तद्यजुः
शुक्लमीर्यत इति स्मृतत्वाच्च शुक्लयजुर्विधानेनापि मुख्यत्वात् अपि च अयातयामानि तु
मानुगुप्तान्यन्यानि जातान्यतिनीरसानि यजूंषि तेषामथ याज्ञवल्क्यो ह्ययातयामा राम
ति रवैरवापेति भविष्यद्वचनेन काण्वादिशाखानां वीर्यवत्वाभिधानाच्च मुख्यत्वमिति प्र ६

सिद्धं यदुक्तं वेदव्यासेन द्वापरादौ ग्रनुक्रपरिवृत्त्या काण्वादीनां अमुख्यत्वमिति असि
द्धं तदपि न सर्वज्ञेन वेदव्यासेन भविष्यत्तां तं ज्ञात्वा सारभूतं यजुर्गणं तां सूर्यायोपदिश्य निधि
ज्वेन स्थापितवान् तदुक्तं वाराहपुराणे हयग्रीवः कदाचित्तु दैत्यो महाबलः सुराणा
मपकाराय वेदानाहृत्य चौर्यतः क्षपित्वा बद्ध्वा वेदान् स पातालं समाविशत् दैत्यं वि
दार्य तान् वेदान् ब्रह्मणोऽसदद्धरिः द्वापरादौ ततो योगी पाराशर्यो महातपाः अवतीर्याथ
तान् वेदान् स्वशिष्येभ्य उवाच ह भाविवृत्तांतमाज्ञाय त्रिकालज्ञो महामुनिः यजूंयातयामा
तिसूर्ये न्यास्यचित्तिये छर्दित्वा याज्ञवल्क्यो यो छंदांस्यपगावेबयन् गुरोरविद्यमानानि सू
यतस्ये विभावसुं सूर्यप्रसादकालेन प्राप तस्माद्यजुर्गणान् शुक्लान्ययातयामानि यजूंषि
प्राप्य भास्वतः शाखाश्चक्रे पंचदश काण्वाद्याश्च महामुनिरिति एवमतो हितारताख्याने



Indira Gandhi National Centre for the Arts

पितृनिर्धाचेनस्यापितं सारभूतं यजुर्गणं याज्ञवल्क्ययोपदेशेति व्याख्येयं तद्यथा भारते
याज्ञवल्क्य उवाच अव्यक्तं परमं ह्येतत् पृष्टोहं वै त्वया न्टप परं गुह्यमिमं प्रश्नं श्रृणुष्वावहि
तो न्टप यथार्थेनह विधिना चरताऽत्र क्रमेणाहि मयादित्याद्वाप्तानि यजूंषि मिथिलाधि
प महता तपसा चैव सविता सेवितो मया प्रीतेन चाहं विभुना सूर्येणोक्तस्तदानघ वरं वृणीष्व
भद्रं ते यदिष्टं ते सुदुर्लभं ततस्ते दास्यामि प्रीतात्मा मत्प्रसादोतिदुर्लभं ततः प्रणम्य शिरसा मयो
क्तस्तपतां वरः यजूंषि नोपयुक्तानि क्षिप्रमिच्छामि वेदितुं नोपयुक्तानि मद्गुरुणा तानानी
त्यर्थः ततो मां भगवानाह वितरिष्यामि ते द्विज सरस्वती ह वाग्भूता शरीरं ते प्रवेक्ष्यति पुन
र्मामाह भगवानास्यं स्वं विवृतं कुरु ततो मयास्यं विवृतं प्रविष्टा च सरस्वती ततो विदह्यमा राम
नोहं प्रविष्टोंभस्तदानघ अविज्ञानामर्षाच्च भास्करस्य महात्मनः ततो विदह्यमानं मामु ७

वाच भगवान् रविः मुहूर्तं सह्यतां दाहस्ततः शांतिर्भविष्यति शीतिभूतं च मा दृष्ट्वा भग
वानाह भास्करः प्रतिष्ठास्यति ते वेदः सोत्तरः सखिलो द्विजः कृत्स्नं शतपथं चैव स्वं प्रणेष्यसि
वै द्विज तस्यांते चापुनर्भावे बुद्धिस्तव भविष्यति प्राप्स्यसे व्यपदिष्टं तं सांख्ययोगेप्सितं पदं
एतावदुक्त्वा भगवानस्तमेवाभ्यपद्यत ततोहं व्याहृतं श्रुत्वा गते देवे विभावसौ गृहमाग
त्य संहृष्टोचिंतयं वै सरस्वतीं ततः प्रवृत्तातिशुभा स्वरव्यंजनभूषिता ॐकारमादितः कृ
त्वा मम देवी सरस्वती ततोहमर्घ्यं विधिवत्सरस्वत्यै न्यवेदयं तपतां च वरिष्ठाय निषण्ण
स्तत्परायणः ततः शतपथं कृत्स्नं सरहस्यं ससंग्रहं चक्रे सपरिशेषं च हर्षेण परमेणाह
कृत्वा चाध्यापयामास शिष्याणां शतमुत्तमं विप्रियार्थं सशिष्यस्य मातुलस्य महात्मनः
ततः सशिष्येण मया सूर्येणेव गभस्तिभिः व्यासो यज्ञो महाराज पितुस्तव महात्मनः

Indira Gandhi National Centre for the Arts

निषतो देवलस्यापि तद्ध्येष्टतवानहं स्ववेदशाखिशाखार्थं च विमर्दे मातुलेन ह सुमंतुनाथ
पैलेन तस्यातथा जैमिनिना च वै पित्रा ते मुनिभिश्चैव ततोहमनुमानितः दशपंच च लब्धानि
यजूंष्यकृतिमयानघ तथैव लोमहर्षाच्च पुराणमवतारितं बीजमेतत्पुरस्कृत्य देवीं चैव स
रस्वतीं सूर्यस्य चानुभावेन प्रवृत्तोहं नराधिप कर्त्तुं शतपथं वेदमपूर्वं कारितं च मे यथाभि
लिषितं मार्गं तथा चैवोपपादितं शिष्याणामखिलं कृत्स्नमनुज्ञातस्ससंग्रहं सर्वे च शि
ष्याः सुयमयोगाताः परमहर्षिताः शाखाः पंचदशीमास्तु विद्याभास्करदर्शितः प्रतिष्ठाप्य य
था कामं वेद्यं तदनुचिंतयं किमत्र ब्रह्म सुकृतं किं च वेद्यमनुत्तममिति तस्य वैनिखद्यं तदु रामः
क्तं विस्मृपुराणोत्पत्तौ वांशी पराशर उवाच यजुर्वेदतरोः शाखा ग्रासन्नेकोत्तरं शतं ए ८
कोनाबद्धिः शाखाश्चकार पठाहताः सप्तविंशतिशाखाश्च ततः कृष्णा हृषाः स्मृताः

वैशंपायननामासौ व्यासशिष्यश्चकार सः शिष्येभ्यः प्रददौ ताश्च जगृहुस्तेप्यनुक्रमात्
भाविवित्तांतमाज्ञाय व्यासः सत्यवतीसुतः दशपंच च याः शाखाः सूर्योपदिदेश ह वैशं
पायनशिष्यस्तु याज्ञवल्क्यः प्रकृष्टधीः ब्रह्मरातिसुतो ब्रह्मन् गुरुवृत्तिरतोभवत् ऋषी
णां यो महामेरौ समाजे नागमिष्यति तस्य वै सप्तरात्रं तु ब्रह्महत्या भविष्यति पूर्वमेवं मुनिग
णैः समयो भूत्कृतो द्विज वैशंपायन एकस्तु तं व्यतिक्रांतवांस्तदा स्वस्त्रीयं बालकं सोथ
पदा स्पृष्टमताडयत् शिष्यानाह च भोः शिष्या ब्रह्महत्यापहं व्रतं चरध्वं मत्कृते सर्वे न वि
चार्यमिदं तथा अथाह याज्ञवल्क्यस्तु किमेभिर्बहुभिर्द्विजैः क्लेशितैरल्पतेजोभिश्चरिष्ये
हमिदं व्रतं ततः क्रुद्धो गुरुः प्राह याज्ञवल्क्यं महामतिः मुच्यतां यत्त्वयाधीतं मत्तो विप्रावमा
नक निस्तेजसो वदस्येतान् यस्त्वं ब्राह्मणपुंगवान् तेन शिष्येण नाथोंस्ति ममाज्ञाभंगका

Indira Gandhi National
Centre for the Arts

कृं० रिता याज्ञवल्क्यस्ततः प्राह भक्त्यैतन्मयोदितं ममाप्यालं त्वयाधीतं यन्मया तं सिदं द्वि
६ ज पराशर उवाच इत्युक्त्वा रुधिराक्तानि सरूपाणि यजूंषि सः छर्दयित्वा ददौ तस्मै ययौ
स्वेच्छया मुनिः यजूंष्यथ विसृष्टानि याज्ञवल्क्येन वै द्विजाः जगृहुस्तित्तिरीभूत्वा तैत्तिरी
यास्तु ते ततः ब्रह्महत्याव्रतं चीर्णं गुरुणा चोदितैस्तु यैः चरकाध्वर्यवस्ते तु चरणान्मुनि
सत्तम याज्ञवल्क्योऽथ मैत्रेय प्राणायामपरायणः तुष्टाव प्रयतः सूर्यं यजूंष्यभिलषं
स्ततः याज्ञवल्क्य उवाच नमः सवित्रे द्वाराय विमुक्तेरमिततेजसे ऋग्यजुःसामभूताय त्र
यीधाम्ने च ते नमः नमोऽग्निसूर्यभूताय जगतः कारणात्मने भास्कराय परं तेजः सौषुम्णमुरु
बिभ्रत इत्याद्याख्यानकाभिः पंचदश शाखानामनंतरभावित्वमिति निकृष्टमिदमपि चुद्रोपद्र राम
व इति संक्षेपः अथ पंचदशस्वपि शाखासु मुख्यत्वेति वेदितव्या तदुक्तं ब्रह्मनारदीये यजुर्वे ६

दमहकल्पतरोरेकोत्तरशतं शाखास्तत्र शिखाकारा दशपंचाशमुत्कृष्टाः तत्रापि मु
ख्ये विज्ञेयं शाखा माध्यंदिनी यजुरिति लोके प्रसिद्धेरपि प्रमाणीवचनं माध्यंदिनाश्रम
नंतिपश्चात्काण्वा इति तत्र केचिदेवमाचक्षते चरणव्यूहादिषु पुराणादिषु शाखाविभा
गकथने काण्वशाखायाः प्रथमोद्देशात्तेनैव क्रमेण मंत्रक्रमोऽध्यवसेय इति तत्रेदमुच्यते
न तावच्छाखापाठक्रमेण मंत्रक्रमः सं प्रतिपन्नोऽस्ति तत्रैव क्रमभंगाशंक्यते यत्र क्रमभंगे
प्रत्यवायो नैष्फल्यं वा भवति यथा वेदमकृत्वा भोजने प्रत्यवायो यथा वा दर्शपूर्णमा
साभ्यामनिष्ट्वा विकृतीनामनुष्ठाने नैष्फल्यं न चात्र पूर्वपूर्वमंत्रपाठमंतरेणोत्तरशाखीयं
मंत्रपठने कश्चित् प्रत्यवायो नवा नैष्फल्यं भवति किंचैवं क्रमविवक्षया होमादिकर्मसु चतुर्वे
दानां योगपद्येन मंत्रपाठो न स्यात् क्रमभंगापत्तेः अपि चैवं शाखीयानां तत्तच्छाखापरायणा

Indira Gandhi National Centre for the Arts

कं० दाने युगपत्पारापर्यं न स्यात् एवं च ऋग्वेदपारापर्यं समाध्येव यजुः पारापर्यं तत्समाध्ये
१० वसामपारापर्यं स्यात् तच्च सकलशिष्टाचारविरुद्धं किंचैवं केन पुरुषेण युगपत्सकलशा
खापठनस्य कर्तुमशक्यत्वादृतन्ययात्यात्तत्र को ज्ञाभविष्यति पुरुषभेदेन च तत्तच्छाखीयमंत्र
पाठक्रमएव नाकांक्षितः किंच यामकानुसारेण अपि च नियमान्यत्रे निजैमिनिसूत्रेणाशा
खाभेदेनाम्नातानां मंत्राणां क्रमनियमो नास्तीति स्पष्टमावेदितं न न व माध्यंदिनीयमंत्र
स्यैव प्राथम्ये किं नियामकमिति चेत् ऋग्वेदमंत्रस्य प्राथम्ये वं नियामकं तदेवात्रावधारय न
हि तत्र ऋग्वेदोथ यजुर्वेदः सामवेदोत्यथर्वेण इति पाठक्रमो नियामकः तथा सति यौगपद्येन राम
पानप्रत्यवायोनैकल्प्यं चाप्रसज्येत युगपत्पारायणं चानुपपन्नं या स्यात् स्तोमस्त्र यजुष्ट्रे १०
ऽपि महीधराचार्यभाष्यादिविरोधोपि ननु शिष्टाचारोपि प्रमाणं स्यात् स्यादेव यदाहुः पारा

शरस्मृतिव्याख्यातारो माधवाचार्याः अथ स्मृतिस्मृत्यो रिव सदाचारोपि अलौकिकावि
गीतः प्रमाणं तथा च पराशरः धर्मजिज्ञासमानानां प्रमाणं परमं श्रुतिः द्वितीयं धर्मशास्त्रं तु
तृतीयं धर्मसंग्रह इति मनुरपि वेदोखिलो धर्ममूलं स्मृतिशीले च तद्विदां आचारश्चैव सा
धूनां मात्मनस्तुष्टिरेव च इति शिष्टाचारप्रामाण्ये अलं वाक्यैः बहिर्विंशतित्रयं न्यायेन त
थाचरिष्टाचारं प्रामाण्यादुमंत्रस्य प्राथम्यमिति चेत् माध्यंदिनीयमंत्रपाठेपि तुल्यं इय
मापत्तिस्तस्येष्टापिनी किंचैवं मंत्राम्नानवत्क्रमोर्थाः पदार्थदेवतादेशादिस्मारकत्वेन क
र्मांगभूताः सर्वैकवाक्यतापन्नप्रधानभूतेषु चाग्निहोत्रादिकर्मसु पाठक्रमो न नियामकः
किंत्वर्थक्रमएवेति प्रपंचितं चैतत्क्रमो विध्यर्थः कर्मैरपसंभवादितिसूत्रे देवयाज्ञिकपि
त्तभूत्यादिभाष्यकृद्भिः तथा च प्रधानभूतकर्मस्वेव पाठक्रमो नाद्रियते किमु तत्तदंगभू

तमंत्रपाठस्यादरइतिचिंतनीयं एवंचसतिमंत्रब्राह्मणयोर्वेदइति शौनकोक्तवाक्येना

पि माध्यंदिनशाखायाः माधान्यमित्यध्यवसीयते तथाहि वेदशब्देनात्रप्रणवः वेदोयंब्रा

ह्मणाविदुर्वेदनैवयद्वेदितव्यमितिशतपथे श्रवणात् सप्रणवःयत्रत्रिगुणं त्रिमात्रं प्लु

तंमितियावत् यथास्यात्तथा यत्रपठ्यते सयजुर्वेदइत्यर्थः प्लुतप्रणवपाठश्च माध्यंदि

नीयशाखायामेव तथाचोक्तं कौशिक्यां माध्यंदिनीयत्वेपंप्लुतचतुष्टयं प्रणवोजंघ-

नोनामतोहिणीस्कंदकीतया एतेप्लुताश्चचत्वारो यजुर्वेदेबुधैःस्मृताइति अतएवलो

के माध्यंदिनेयेवचयजुर्वेदव्यवहारः अन्यत्रतुकाण्वामैत्रायणीपाठकाइतिदिक् स्त

त्यंतरे माध्यंदिनीतुयाशाखासर्वसाधारणीस्मृता तामेवाश्रु पुरस्कृत्यव्याशिष्टेनप्रका राम

शतमितिवशिष्ठपद्धतौ माध्यंदिनीशाखायाः सर्वशाखोपयोगित्वस्य ११

~~[illegible] माध्यंदिनीयजुर्वेदं [illegible]~~

कि॥

ष्टमभिहितं भूपालपद्धतावपि माध्यंदिनीतुयाशाखासर्वसाधारणीस्मृता शाखास्व

कासुकासुसर्कासुआत्विज्ञाध्येदिनिःस्मृताइति अध्वर्युकर्मसुवेदयोगादितिकल्पसू

त्रोक्तेः कात्यायनाचार्यकृतंसर्वानुक्रम[illegible]स्याःकात्यायनकृतानुयाव्याख्यातस्या-

श्चहोलीरःकुर्वनत्वागणताधियं विलोक्यसर्वदक्षिणाभाष्याणिविविधानिच दृष्ट्वामया

वाक्यकात्यायनाचार्यैःप्रोक्तसूत्रेतुसर्वोप्योस्याःश्रेष्ठंसप्रष्टतरमुक्तं तथाचदं होलीरभाष्यं

यजुर्वेदस्तुमूलंहितेदोमाध्यंदिनीयकंसर्वानुक्रमं सर्वानुक्रमप्रारंभेप्रथमंमंगलाचरणा

पूर्वकंयजुर्वेदस्यमुख्यत्वकथनपूर्वकं ऋषिछंदोदेवतताज्ञानार्थंप्रतिज्ञासूत्रमाह मंडलद

त्तिनामशिदृदपंचाधिष्ठितंयेनशुक्लानियजूंषिभगवान्याज्ञवल्क्योयतःप्रापतंविव

स्वतंत्रयीमयपवर्चिषंतमभिध्यायमाध्यंदिनवाजसनेयकेयजुर्वेदाम्नायेसर्वेसखिले

णि तस्याःकात्यायनकृतानुया व्याख्यातस्यास्तु

होलीरःकुर्वनत्वागणाधियं विलोक्यसर्वसूत्रा

Indira Gandhi National Centre for the Arts

कं० सभृक्रिये ऋषिदैवतछंदांस्यनुक्रमिष्याम इति तत्रेदमन्वयः वयं कात्यायनाचार्यः य
१२ जुर्वेदाम्नाये ऋषिदैवतछंदांसि अनुक्रमिष्यामः मंत्रद्रष्टारो ऋषयः दैवतानि मंत्रांतर्ग
द्रा तानि छंदांसि गायत्र्यादीनि एतानि वक्ष्यामः नन्वत्राचार्येण यजुर्वेदाम्नाय इत्यभिधाना
तु आम्नायशब्देन वेदः यजुर्वेदश्चासौ आम्नायश्चेत्येवं समासो न घटते यस्माद्यजुर्वेदपदेनै
व सिद्धे आम्नायपदमवाच्यमिति वेदाचार्यवचनस्य व्यर्थता स्यादिति चेन्न आचार्येणाम्नायशब्दो
मुख्यत्वे दृष्टः आम्नायश्रुतिमुख्ये च यो रित्यभिधानात् तस्मादाम्नायपदं गृहीतं तत्रेत्थं स
मासः यजुर्वेदस्याम्नायः यजुर्वेदाम्नायस्तस्मिन्यजुर्वेदाम्नाये ऋष्यादिकं वक्ष्याम इत्य
र्थः ननु यजुर्वेदस्य षडशीतिभेदात्मकत्वादाम्नायो मुख्यो न ज्ञायत इति कस्मिन्यजुर्वेदाम्नाय राम
इत्यतस्तं विशेषयति वाजसनेयके इति वाजसनेयिनामपि पंचदशभेदात्मकत्वान्न ज्ञायत १२

इत्यतस्तं विशेषयते माध्यंदिनीयके इति वाजसनेयावांतरभेदे माध्यंदिनीयसंज्ञे यजुर्वेदा
म्नाय इत्यर्थः आम्नायो मुख्यः अन्याम्नायस्तस्य द्वितीयः प्रकारः निधिर्मुख्यः प्रतिनिधिस्तस्य
द्वितीयः प्रकारः द्वितीय इत्यादावपि मुख्यामुख्यत्वं ज्ञेयं यजुर्वेदलक्षणं शौनकेनोक्तं मंत्रब्रा
ह्मणयोर्वेदस्त्रिगुणं यत्र पठ्यते यजुर्वेदः स विज्ञेय अन्यः शाखांतरं स्मृतं यतच्छंदोलक्ष्मां
विनात्तानुमतांस मतोस्माभिर्व्याक्रीयते मंत्रस्य ब्राह्मणस्य च वेदसंज्ञा इत्यर्थः तयोर्लक्षणमा
ह केरा विधिर्विधेयस्तर्कश्चार्थवाद इति विधिर्विधायकं वाक्यं विधेयो मंत्रः तर्कोर्थवाद इति त्र
याणामपि वेदसंज्ञा एतत्त्रयं शतपथब्राह्मण एव पठितं सोसावाज्यमधिश्रयतीति विधिः इषे ऋ
त्वेति विधेयो मंत्रः वज्रस्यैत दाह रक्षो भि त्वेत्यर्थवादस्तर्क इत्यादिर्ज्ञेयं तथाच याज्ञवल्क्यशिक्षायां
अपरिज्ञातां प्रवक्ष्यामि याज्ञवल्क्यः परिस्फुटं यजुर्वेदस्य मंत्राणां सम्यक्पाठस्य सिद्धये प्र

Indira Gandhi National Centre for the Arts

कं० तावेप्राक्प्रयुंजीत व्याहृतिस्तदनंतरं सावित्रीं चानुपूर्व्येण ततो वेदं समारभेत् इति संहि
१३ तामं अस्य ब्राह्मणस्य च वेदत्वमुक्तं त्रिगुणं यत्र पठ्यते यत्र मंत्रब्राह्मणात्मके वेदे मंत्रब्राह्म
णा एव माठ्यपत्र आविष्कृतदैवतविनियोगात्मकं त्रिगुणं यस्यां शाखायां पठ्यते स यजु
र्वेदो मुख्यः अन्ये शाखांतराणि त्रिगुणालक्षणां गुणमालायां अन्यथोक्तं माध्यंदिनयजु
र्वेदे सब्राह्मणं तमुदाहृतं तासु पूर्वैर्हि त्रिगुणो नान्यशाखास्वमुख्यतः तथा पराशरः समाम्ना
वत्तरादिय मंत्रब्राह्मणयोर्द्विजः ॐ खं ब्रह्मेति यो ध्यायन् दर्शकश्रोपवेधसः तथा च या
ज्ञवल्क्यः ओंकारपूर्वं त्रिगुणं अक्षरं च त्रिदैवतं त्रिब्रह्मसु त्रिषु स्यान्मंत्रिकल्पं त्रिप्रति- राम
ष्ठितं सत्वरजस्तमश्चेति अयं च ॐकारस्त्रिगुणो अक्षरं च त्रिगुणं तथा माध्यंदिनीय १३
शाखायां यजुर्वेदे पठंति हि इति आपी प्रतिब्रह्मोपदेशः पराशरोक्तः तस्माद्यथार्थ पारंग

तं यो भगवता कात्यायनाचार्येण माध्यंदिनीसंज्ञाया शाखाया यजुर्वेदाम्नायत्वानु
ख्यातमुक्तमिति एवमेवोक्तं श्रीरुद्रकल्पद्रुमे अनंतदेवैः खंब्रह्मांततायाः कण्वशा-
खाया यजुर्वेदाम्नायपि अभावस्तया पि माध्यंदिनशाखायाः सर्ववाजसनेयिशाखासा
धारणात् पराशरोक्तो रुद्रेति कर्तव्यताविधिः सर्ववाजसनेयिशाखायां साधारणमि
ति चेदुच्यते नित्यनैमित्तिककाम्यवैकल्पिकानि कर्माणि भगवता सूत्रकृता माध्यंदि
न शाखायाः सर्वशाखासाधारण्ये नोपनिबद्धानीति माध्यंदिनीशाखा सर्वशाधारणो रवाक्षी ६
ति यथाव्यग्न्याधानमध्वर्युर्यजमानो वेति सूत्रव्याख्यानावसरे शाखाद्वयमधिकृत्य
तात्पर्येणानुप्रवृत्त आचार्यस्तत्र नित्यनैमित्तिककाम्यवैकल्पिकानि कार्याणि नोपनिब
द्धानि शाखाद्वयव्यतिरेकेणैव भिक्षमात्रे भवेति कर्कोपाध्यायैरुक्तं तथापि माध्यं

Indira Gandhi National
Centre for the Arts

कं॰ दिनशाखामेवाधिकृत्यावार्थप्रवृत्तिर्मुख्या आचार्यामिश्रवात् तथाहि येमंत्रामा
१४ ध्यंदिनशाखातः कण्वशाखायामधिकाः समधीताः मित्रस्य चाक्षुषा प्रतीक्ष इति
नमक्षतापकर्मणा इति यस्ते प्राणा इति आप्यायतां ध्रुवा इयिबेति उलूखलेमुसले
त्येवमाहः एतेतु मंत्रासंपूर्णा एवमेव भगवता सूत्रे उपनिबद्धाः येतु काण्वशाखातो
माध्यंदिनशाखायामधिकाः समधीताः अपमग्निः पुरीष्योरयिमानितिशिवोना
मासिस्वधितिस्ते इति अंगिरसोनः पितर इत्येवमाह एतेतु द्वयोः शाखयोः समाम्ना
तीर॰ ता मंत्रा इत्यत्र क्रमात्रेसौवोपनि[illegible]लब्धा इति द्वयोः शाखयोः समप्रमुख्यप्रवृत्तित्वेमा
ध्यंदिनशाखायामप्यनधीताः माध्यंदिनशाखामंत्रासंपूर्णा इवसूत्रे भगवता उप राम
निबद्धा भवेयुः यस्तु सूत्रकृता काण्वमाध्यंदिनशाखयोः समाम्नातो यस्मात्तमधि १४

कं॰ जातोसीतिमंत्रः सूत्रे उपनिबद्धस्तस्य पत्न्यामप्यनूरुहप्रसूतप्राप्त्यर्थत्वे प्रयोजनवत्वा
१५ न्न दोषः अतएवोक्तं भट्टयज्ञपतिमूलिवासुदेवकर्कोपाध्यायानंतदेवयाज्ञिकादि
भिर्भाष्यकारैः सकलमंत्रपाठः पत्न्यामप्यनूरुहप्रसूतप्राप्त्यर्थ इति तस्मात् माध्यंदिनीशाखै
व पंचदशसु वाजसनेयिशाखासु मुख्या सर्वसाधारणा अतएवोक्तं वसिष्ठेन मा
ध्यंदिनीतु या शाखा सर्वसाधारणा हि सेति संक्षेपः इति श्रीकंठाभरणे माशामं
त्रविचारः समाप्तः

राम
१५

Indira Gandhi National
Centre for the Arts